**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2023 SHISRRJ | Volume 6 | Issue 6
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# आजीविकाविचार:

डॉ. रामदास शर्मा
ज्योतिषविभाग:, अध्यक्ष:, केन्द्रीयसंस्कृतविश्वविद्यालय:,श्रीरणवीर परिसर: ।

**Article Info**
**Publication Issue :**
November-December-2023
Volume 6, Issue 6
**Page Number :** 256-260

**Article History**
Received : 02 Nov 2023
Published : 21 Nov 2023

**शोधसारांश:-** आधुनिकुयगे बहव: वृत्तय: सञ्जायन्ते परन्तु यदि शोधदृष्ट्या विचार्यते तर्हि मूले पूर्वोक्तं तथ्यं सन्दृश्यते। अद्य यान्त्रिकी- चिकित्सा वैज्ञानिकक्षेत्रेभ्य: या काऽपि वृत्ति: समुत्पन्ना दृश्यते , सा नूनं पूर्वोक्तग्रहाधारेण वर्णिता: सन्ति। यथा अद्यापि चिकित्साक्षेत्रे रविचन्द्रयो: प्रभाव:, यान्त्रिकीक्षेत्रे भौमस्य प्रभाव: , काव्यरचनादिकार्ये बुधस्य प्रभाव: स्वयमेव दृश्यते । अग्रे स्वयमेव विद्वांस: विचारयन्ति यत् कुत्र का च वृत्ति: जातकस्य कृते उत्तमा इति। इदानीं वैज्ञानिकुयगे व्ययाधिक्ययुगे च नूनं बालकाले वृत्तिनिर्धारणसम्बन्धिनि इयं प्रक्रिया अतीव महत्त्वपूर्णा चामत्कारिकी च वर्त्तते , यया सम्यक् दिङ्गनिर्धारण पूर्वकं जातकस्य विकासाय प्रयतमाना दृश्यते।

**मुख्यशब्दा:-** वृत्ति:, आजीविकाविचार:, विद्वांस:, चिकित्सा, ग्रह:, भाव:।

जीविका भवति जीवनयापनस्य साधनं माध्यमो वा । जीविकाविहीनस्य नरस्य जीवनं दुष्करं भवति । कोषकारेण तु जीविकाया: अपरं नाम जीवनमपि स्वीकृतम् । तद्यथा– " आजीवो जीविका वार्ता वृत्तिर्वर्तनजीवने " इति । शब्दशास्त्रानुसारेण जीव् अकन् , अत इत्वम् इत्थं जीविकाशब्द: सिद्धयति । जीविका अर्थात् येन माध्यमेन यया वृत्या वा स्वस्य परिवारस्य समाजस्य चार्थिकदृष्ट्या परिपालनं भवति तज्जीविका शब्देनोच्यते । अतएव मानवजीवने जीविकाया: स्थानं सर्वाधिकं महत्त्वपूर्णं वरीवर्ति। अत्र जीविकापदेन राजकीयसेवा GOVERMENT SERVICE इति नैव अवगन्तव्या, अपितु जीविकापदेन विभिन्नव्यवसाया: तथा शिल्प – कृषि प्रभृति कार्यायपि व्याख्यायितानि भवन्ति । जातकस्याजीविकाया: निर्धारणम् आधुनिकुयगे ज्योतिषशास्त्रस्य परमोपादेयता दैवज्ञ मिहिरेण सामान्यजनैश्च मन्यते। यतो हि जातकस्य वृत्तिनिर्धारणं यदि पूर्वमेव भवति तदा स जातक: तस्मिन् क्षेत्रे कार्यो व्यापारे वा समापितमनसा सन्नधतां करोति। तथा च जातक: अल्पेनैव कालेन सफलीभूता: सन् अर्थार्जनं च करोति।

**Copyright © 2023 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

ज्योतिषशास्त्रस्य जातकग्रन्थ बृहज्जाके आचार्यवराहमिहिरेण 'कर्माजीवनामाध्याय: वर्णिता:', तत्र ग्रहाधारेण जातकस्य कर्मक्षेत्रनिर्धारणं तत्सम्बन्धितयोग्यताया: परिगणना च सौलभ्येन प्राप्यते। तत्रोक्तं यत् आजीविकाविचार: कुत: क्रियते, क: भाव: तस्य कारक: तथा क: ग्रह: वृत्तिनिर्धारणे महत्त्वपूर्ण: इति यथा–

**होरेन्द्वोर्दशमगतैर्विकल्पनीया भेन्द्वार्कास्पादपतिगोसनाथकतया**[1]

प्रसङ्गेऽस्मिन् आचार्यभटोत्पलेन प्रोक्तम् – अनेन पुरुषेण कथं धनमर्जयित व्यमित्यध्याये निरूप्यते । अत्र च प्रकारद्वयेन धनदाता ग्रहो भवति लग्नाच्चन्द्र भावाच्च , यो दशमस्थो ग्रह: स धनदाता भवति । अथ लग्नचन्द्रयोर्दशमस्थाने शून्ये भवतस्तदा लग्नचन्द्रादित्यानां ये ये दशमराशयस्तेषां येऽधिपतयस्ते येषु नवांशकेषु पुरुषस्य जन्मकाले स्थितास्तेषां नवांशकानां ये ग्रहा: अधिपतयस्ते ग्रहा: धनदातारो भवन्ति । किन्तु लग्नाच्चन्द्राच्च ये दशमस्थग्रहा: ते अनेन प्रकारेण धनदातारो भवन्ति । एवमेव वर्णनम् आचार्यमन्त्रेश्वरेण फलदीपिकायां प्रतिपादितम् अस्ति ।

तत्रोक्तं कर्मजीवभेदाध्याये यत्–

**अर्थाप्तिं कथयेद्विलग्नशशिनो प्राबल्यत: खेचरै:**

**दिननाथलग्नशशिनां मध्ये बलीयांस्तत: ।**

**कर्मेशस्थनवांशराशिपवशावृत्तिं जगुस्तद्विद: ।**[2]

अतोऽत्र निर्धारितमस्ति यत् प्रकारद्वयेन धनदाता ग्रहो भवति, तत्राद्य: लग्नात् अपरो चन्द्रवशात् च। तत्र उभयो: मध्ये यो नूनं बलवान् तस्य यो दशम: स सूर्यादिग्रहेण पित्र्यादिवशाद् धनलाभो भवति । तद्यथा–

सूर्य: –पितृणा, चन्द्र:–मातृणा, भौम: –शत्रुणा, बुध:– मित्रेण गुरु: –भ्रातृणा, शुक्र: –भार्यया शनि –भृत्येन:

एवमत्र प्राय: सर्वेऽस्मिन् ग्रन्थे पूर्वधनदाताग्रहाणां निर्धारणं तद्वशात् पित्र्यादीनां । निर्धारणविषये प्रोक्तं यत् – सूर्य – शशि–लग्नेषु य: बली , तत: दशमस्थनवांशराशिपवशात् वृत्तिं जानीयात्। भटोत्पलेन टीकायाम् आचार्यगर्गस्य वचनमुद्धतम्। तद्यथा–

**उदयाच्छशिनो वापि ये ग्रहा दशमस्थिता:।**

**ते सर्वेऽर्थप्रदा ज्ञेया: स्वदशासु यथोदिता: ।।**

**लग्नार्करात्रिनाथेभ्यो दशमाधिपतिग्रह: ।**

**यस्मिन्नवांशे तत्कालं वर्त्तते तस्य य: पति: ।।**

**तद्वृत्त्या प्रवदेद्वित्तं जातस्य बहवो यदा ।**

**भवन्ति वित्तदास्तेऽपि स्वदशासु विनिश्चितम् ।।**[3]

वस्तुतस्तु समेषां ग्रहाणां सम्बन्धितं पृथक् – पृथक् कार्यं व्यापारादिकं वा निश्चितं वर्त्तते , ज्योतिषशास्त्रे फलप्रदायका: ग्रहा: एव भवन्ति । ग्रहाधीनं फलं भवति , अतोऽत्र क: ग्रह: एतादृश: अस्तीति विचार्यते । तत्रोक्तं – रवि –

चन्द्र – लग्नेषु यः बली ग्रहः ततः दशमस्थनवांशपतिवशात् वृत्तिं विचारणीयं भवति । तत्र यदि सूर्यादिग्रहाः नवांशपतयः भवन्ति तदा निम्नलिखितवृत्तयः भवन्ति ।

नवांशपतिसूर्येण – तृण – कनक – भेषजाद्यैः , धातुक्रियाद् , क्षितिपालपूज्यात् मन्त्रजपैश्च जीवति जातकः ।

चन्द्रेण– जलोद्भवेन , कृषिक्रिया – गोमहिषीसमुत्थैः , अङ्गनाभयाच्च जातक जीवति । जीवनं यापयति ।

भौमेन – धात्वाग्निसाहसैः , भूमिवशात् , आयुधैः , सूचक – चोरवृत्त्या च जातकः .

बुधेन – लिपिगणितादिकाव्यशिल्पैः , लेखक – ज्योतिषगणितज्ञानेन , पुरोहित कुसीदवशाच्च जातक : वृत्तिं गृह्णाति ।

गुरुणा – द्विजविबुधकरादिधर्मैः , पुराणशास्त्रागमनीतिमार्गधर्मोपदेशेन ,

शुक्रेण – मणिरजतादिगोमहिष्यैः , स्त्रीसंश्रयात् , रजतैः , गन्धैः , अमात्यगुणैः , कवित्वात् अलङ्कारैश्च जीवति ।

शनिना– मूलफलैः खलैर्नीचधनैः , कुधान्यैः कुत्सितमार्गवृत्त्या , शिल्पादिभिश्च जातक : जीवति।

**बृहज्जातके मिहिरेण उच्यते-**

**अर्थाप्तिः पितृपितृपत्निशत्रुमित्रभ्रातृस्त्रीभृतकज नाह्दिवाकराद्यैः । होरेन्द्वोर्दशमगतैर्विकल्पनीया भेन्द्वर्कास्पदपतिगांशनाथवृत्या ।।**[4]

लगनात् दशमस्थस्य ग्रहात् यदि दशमे कोऽपि ग्रहः न स्यात् तर्हि चन्द्रात् दशमे स्थितस्य ग्रहात् आजीविका विचारः कर्तव्यः। लग्नात् वा चन्द्रात् दशमे भावे सूर्यः भवतिश्चेत पैतृकसम्पत्तेः उपयोगम् करोति। चन्द्रात् पितरौ गेहात्। भौमः राज्ञोः सम्पत्तिः हननम करोति। बुधः सहजजनेभ्या वा सुद्देश्यः सम्पतिः प्राप्नोति। अमरमन्त्रिः भातृ जनेश्च सम्पत्तिः प्राप्नोति। सितः अंगनाभिः धनम् प्राप्नोति। दशमस्थः शनिः भृत्येभ्यः आजीविकाम प्राप्नोति।

यदि लग्नात्, चन्द्रात्, सूर्यात् वा दशमे कोऽपि ग्रहः न स्यात् तर्हि लग्न चन्द्र सूर्यात् दशम भावस्य या नवांश राशि भवति। तस्मात् गुणधर्मानुसारेण जातकस्य आजीविका विचारः कर्तव्यः।

**अर्कांशे तृणकनकोर्णभेषजाद्यैश्चन्द्रांशे कृषिजलजाङ्गनाश्रयाच्च ।**

**धात्वग्निप्रहरणसाहसै : कुजांशे सौम्यांशे लिपिगणितादिकाव्यशिल्पै : ।।**

**जीवांशे द्विजविबुधाकरादिधर्मैः , काव्यांशे मणिरजतादिगोमहिष्यैः ।**

**सौरांशे श्रमवधभारनीचशिल्पैः कर्मेशाध्युषितनवांशकर्मसिद्धिः ।।**[5]

**लग्नः चन्द्रः सूर्यात् दशमेशः यस्य खेटस्य नवांशे भवति तस्य ग्रहस्यानुरेण आजीविका विचारः कर्तव्यः।**

(क) दशमेशः यदि सूर्यस्य नवांशे भवति क्षेत्र तर्हि तृणात्/ अन्नात/ वृक्षादि व्यवसायात्। सुवर्णाति कार्यात् जातकः धनम् अवाप्नोति।

(ख) चन्द्रस्य नवांशे कृषि कर्मात्। नीरात् उत्पन्न वस्तुभ्यः। धनम् प्राप्नोति।

(ग) दशमेशः भौमस्य नवांशे भवति क्षेत्र सुवर्ण, रजतेभ्यः धातुभ्यः धनम् प्राप्नोति।

(घ) यस्य जातकस्य दशमेशः बुधस्य नवांशे भवतिश्चेत् सः सुन्दरलिपिकारः (मातृकासम्पादनकर्ता) गणिते रुचि। नाना प्रकारक व्याख्यानः त धनम् प्राप्नोति।

(अ) दशमेशः गुरोः नवांशे भवतिश्चेत् विप्रेभ्यः, सुवर्णादिभ्यः धनम् प्राप्नोति।

(ब) दशमेशस्थ शनेः नवशांत् बहुपरिश्रमेण, हिंसककर्मणा, मांसादि व्यापारेण धनम् प्राप्नोति।

(स) दशमेशः यस्य ग्रहस्य नवांशे भवति तस्य नवांश सदृशम् यथा– द्रव्य, स्थान, कालातिश्चः तस्य च रूपवत् धन प्राप्नोति। तथा तस्य ग्रहस्य दशान्तर्दशादि, गोचराशिदेः शुभ अवस्थायाम् तस्मात्, वस्तीः धन प्राप्तिः कुर्यात्।

जैमिनीयसूत्रे आत्मकारकस्य नवांशवशात् वृत्तिनिर्धारणं क्रियते। एवमत्र प्रथमाऽध्यायस्य द्वितीयपादस्य चतुर्दशसूत्रादारभ्य विंशतिसूत्रं यावद् बहूनि सूत्राण वृत्तिनिर्धारकाणि विलसितानि सन्ति । तद्यथा–

**तत्र रवौ राजकार्यपरः , पूर्णेन्दुशुक्रयोर्भोगी विद्याजीवी च ।**

**धातुवादी कौन्तायुधो वह्निजीवी च भौमे ।**

**वणिजस्तनुवायाः , शिल्पिनो , व्यवहारविदश्च सौम्ये ।**

**कर्मज्ञाननिष्ठा वेदविदश्च जीवे ।**

**राजकीयाः कामिनः शतेन्द्रियाय शुक्रे । प्रसिद्धकर्माजीवः शनौ ।**

**धानुष्यकाश्चौराश्च जाङ्गलिका लोहयन्त्रिणः राहौ ।**[6]

एवमत्र प्रायः ग्रन्थान्तरेषु फलोपपादने समानता भजते परन्तु निर्धारणतत्त्वानि अन्तरितानि सन्ति । यतो हि अत्र कारकग्रहवशादेव सर्वफलं वर्णितमस्ति । अत्र राहोः आजीविकाऽपि प्रतिपादिता वर्त्तते । आजीविकाविचारे न केवलं कारक – नवांशपयोः एव महत्त्वं सर्वाधिकं प्रतिपादितं वर्त्तते अपितु ग्रहयोगवशादपि जातस्य वृत्तिनिर्धारणं क्रियते । तद्यथा जातकपारिजाते–

**चन्द्रात्कर्मगते रवौ सरुधिरे मत्तः परस्त्रीरतो**

**ज्योतिर्विच्च सचन्द्रजे जलधनस्त्रीभूषणादिप्रियः ।**

**सुगन्धनीलचूर्णादिचित्रकारो भिषक् वणिक्।**

**कर्मस्थानगते मन्दे सासुरेज्ये निशाकरात् ।।**[7]

यद्यपि आधुनिकुयगे बहवः वृत्तयः सञ्जायन्ते परन्तु यदि शोधदृष्ट्या विचार्यते तर्हि मूले पूर्वोक्तं तथ्यं सन्दृश्यते । अद्य यान्त्रिकी– चिकित्सा वैज्ञानिकक्षेत्रेभ्यः या काऽपि वृत्तिः समुत्पन्ना दृश्यते , सा नूनं पूर्वोक्तग्रहाधारेण वर्णिताः सन्ति । यथा अद्यापि चिकित्साक्षेत्रे रविचन्द्रयोः प्रभावः, यान्त्रिकीक्षेत्रे भौमस्य प्रभावः , काव्यरचनादिकार्ये बुधस्य प्रभावः स्वयमेव दृश्यते । अग्रे स्वयमेव विद्वांसः विचारयन्ति यत् कुत्र का च वृत्तिः जातकस्य कृते उत्तमा इति।

इदानीं वैज्ञानिकुयगे व्ययाधिक्ययुगे च नूनं बालकाले वृत्तिनिर्धारणसम्बन्धिनि इयं प्रक्रिया अतीव महत्त्वपूर्णा चामत्कारिकी च वर्त्तते , यया सम्यक् दिङ्गनिर्धारण पूर्वकं जातकस्य विकासाय प्रयतमाना दृश्यते।

**सन्दर्भः**

1. बृहज्जातकम्10.01
2. फलदी .5.1
3. बृहज्जातकम् 1011 टीकायां
4. बृहज्जातकम् 10.01
5. बृहज्जातकम् 10.2-3
6. जैमिनिसूत्रम् 1.2.14-20
7. जातकपारिजात 15.55